


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
IJAAS 2019; 1(1): 138-139
Received: 20-05-2019
Accepted: 24-06-2019

**डॉ० लीला बिहारी चौधरी**
पूर्व व्याकरण व्याख्याता, लगमा (रामभद्रपुर), लोहनारोड, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ० लीला बिहारी चौधरी**
पूर्व व्याकरण व्याख्याता, लगमा (रामभद्रपुर), लोहनारोड, दरभंगा, बिहार, भारत

# रप्रत्याहारखण्ऽनमण्ऽनविचारः

## डॉ० लीला बिहारी चौधरी

### सारांश
वैयाकरणानाम्मते ''रप्रत्याहार'' अस्ति नवेति पक्षविपक्षात्मक पुरश्चरं विवेचन पुरस्परं सम्यक विचार विमर्शश्चापि प्रस्तुतालेख माध्यमेन गुणाक्षरन्यायेन विश्लेषणं कृतम्। तत्र 'रप्रत्याहारे' केन किम्बुक्तम इति सम्यक्तया संक्षेपणम्मया लिखितम्।

### प्रस्तावना
''प्रयोजनमनुदिश्यमन्दोऽपिन प्रवर्तते'' इतिलक्षणरीत्या भगवता पाणिनिना सर्वप्रथमं सप्रयोजनम्मऽगलस्मरणपूर्वकमाक्षरसमाम्नायस्थाः वर्णाः दृष्टास्सकृदुपदिष्टास्संगृहीताश्च। इमे दृष्टास्सकृदुपदिष्टाः वर्णाश्च ''अ, इ, उ, ण'' इत्याभ्य ''हल'' इत्यन्तं यावन्माहेश्वर पदेन व्यवहर्यन्ते। तदुक्तम्–[1]. इतिमाहेश्वराणि सूत्राण्यणादिसत्रज्ञार्थानि। अत्रेदं बीजं यच्चतुर्दशसूत्र्याक्षरसमाम्नाय इति व्यवहारानुपपत्तिराम्नायसमाम्नायशब्दयोर्वेदे एव प्रसिद्धेरित्यह आह–माहेश्वराणि। अस्यायम्भावो माहेश्वरादागतानीत्यर्थः। महेश्वरप्रसादलब्धानीति फलितम्। एवत्र्चैवमानुपूर्वीका श्रुतिरेवैषा। तत्प्रसादपाणिनिना लब्धा।[2]. श्रुतिमूलकत्वादस्यैव वेदाऽगत्वम्।

### तत्रप्रमाणम्–
येनाक्षरसमाम्नायमधिगम्यमहेश्वरात।[3].
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनयेनमः।।

इति शिक्षावचनेनापि आचार्य्यपदेन महेश्वर एव विष्पष्टयते। एवमेव लण्सूत्रव्याख्यानवसरे णकारविषयाचाय्र्यप्रवृत्तिर्ज्ञापयति।[4]. 'व्याख्यानतो विशेषप्रतिपर्त्तिनहि सन्देहादलक्षणम् इति'। इत्यादावाचार्य्यपदेन महेश्वरः। अनुबन्धाश्च महेश्वरकृता एवेत्यनुपदं स्फुटीर्भविष्यति।[5]. 'ञमऽ. णनम्' (मा0सू0–07) इत्य–त्रापि मकार प्रत्याख्यानपरंभाष्यं तु किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं विचारपरम्। सर्वत्रप्रत्याख्यानमेवंपरमेव। अन्यथाऽङानामपि पारायणे धर्मश्रवणेन तत्र–तत्र पाणिनिन्यासप्रत्याख्यानस्याऽप्यसंगतिः स्यात्। तदुक्तम्–'इकोयणचि'। इति सूत्रे–[6]. सामर्थ्ययोगान्नहि कित्र्चिदत्र पश्यामिशास्त्रेयदनर्थकस्यात्। कित्र्चिद्दृष्टादृष्टार्थवत्कित्र्चिच्छुद्धादृष्टार्थवत् सर्वथानर्थकन्न कित्र्चिदिति तदर्थः। वृद्धिसूत्रस्थेऽपि–[7]. वर्णेनाप्यनर्थकेन न भवितव्यम् इति भाष्यग्रन्थेऽनर्थकत्वं बोध्यार्थकत्वं बोध्यार्थराहित्यरूपमितिन निष्प्रयोजनरूपानर्थक्येन तत्र–तत्र प्रत्याख्यानपरभाख्यासंगतिः। अत एवं सोऽयमाक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्ऽितो ब्रह्मराशि इति भाष्यमुपादायोक्तं भर्तृहरिणायथैववेदमव्युच्छिन्नं चन्द्रतारकादिवत् एवमस्याक्षरसमाम्नायस्य न कस्यचिदाधुनिक कर्तास्ति, एवमेव वेदपारम्पर्येण स्मर्यमाण इति। आधुनिक इत्युक्ते शरीरी। पुष्पितत्वं तन्मूलकशब्दाशास्त्रद्वारेण/ शब्दप्रयोगेण चफलितत्वम्।
नन्वत्र 'अ, इ, उ, ण इत्यादिचतुर्दश सूत्रीस्थैर्हलभिरमीभिर्वर्णैर्णकारादिभिरणादि सत्रज्ञज्ञोपपत्तये आह–[8]. एषामिति। प्रसङ्गेऽस्मिन्नाक्षरसमाम्नायस्य चर्चा स्वमुक्तकण्ठेन पापठ्यते, किन्त्वत्र यदि सर्वे सार्थका तहर्याक्षरसमाम्नाये वर्णानां यथा संख्या विद्यते

तथा प्रत्याहारोऽपि व्यवहर्यते। एतेन रप्रत्याहारस्यास्तित्वमनुभूयते। यतु प्रत्याहारविषये द्विचत्वारिशंदुक्तन्ततु ''उरणरपरः'' इत्यत्र लपरत्वसिद्ववयर्थं रप्रत्याहारोपपत्तिरावश्यकी साच लणसूत्रस्थाऽकारस्येत्संज्ञां विना न सम्भवति इति तरसिद्धिप्रकारकं प्रदर्शयति–९. 'लणसूत्रेऽकारश्चेति' एतेनापिरप्रत्याहारस्याऽस्तित्वं भजते, किन्तु कस्तावत्प्रत्याहार इति परिप्रश्ने? समुदेति–प्रत्याह्रियन्ते वर्णः संक्षिप्यन्ते यत्राऽसौ प्रत्याहारः। अस्याऽयंभावः बलाद्वर्णाः अपकर्त्यन्ते यस्मिन् विधावसौप्रत्याहारः। लणसूत्रेऽकारश्चेति प्रसंगे प्रमाणं प्रस्तुतीक्रियते। तु, तुल्यास्य सूत्रस्थं क्वचिदनन्त्येनापि प्रत्याहार इति कैयटीयव्याख्यानशालि–लपरत्वं वक्ष्यामि इति भाष्यमेव 'अतो लन्तस्यं' इत्यत्र पाणिनिकृतलकारोच्चारणेनानित्योऽयं प्रत्याहारः। अन्यथा–प्रत्याहारेणैव निर्वाहात् तत्रलकारोच्चारणं स्पष्टमेव व्यर्थंस्यात्। प्रफूल्लत इत्यत्र 'रदाभ्याम' इत्यनेन निष्ठातकारस्य नत्वाऽभावो नित्यत्वफलबोध्यमिति प्राङ्चः।

नव्यास्तु 'लण' सूत्रस्थाकारो नानुनासिक प्रत्याहारेणैव निर्वाहे पाणिनिकृतस्य 'आतो लान्तस्य' इत्यत्र लकारोच्चारणस्य वैयर्थ्यापतेः। अर्धमात्रालाघवाय यप्रत्याहारेणैव व्यवहारस्य समुचितत्वाद्यणप्रत्याहाराश्रयणस्य वैयर्थ्यापत्तेश्च। आचारादप्रधानत्वाल्लोपश्चवलवत्तर इति भाष्योक्त तृतीयहेतोरव्यापकत्वापत्तेश्च। तथा हि अनुबन्धाः प्रत्याहार जन्य बोधविषयत्वाभाववन्तः लोपशास्त्रीयोदेश्यतावच्छेदकन्ताकान्तत्वात। अत्रप्रथमः पक्षो द्वितीयस्साध्यस्तृतीयो हेतुः पक्षतावच्छेदेन साध्ये हेतोः पक्षतावच्छेदकव्यापकत्वानियमः। प्रकृते 'लण' सूत्रस्याकारस्यानुबन्धत्वेन पक्षत्वसत्वेऽपि पूर्वोक्तसाध्यसत्वात् हलप्रत्याहारसिद्धेः प्रागचपदार्थासिद्धयोपदेशे अजित्यस्य वाक्यार्थाभावेन तस्येत्संज्ञालोपयोरभावाल्लोपरूप हेतोरसत्वेन तस्याऽव्यापकत्वापत्तिस्तयोरभावे भाष्यकृता प्रत्याहारे जातिग्रहणपक्षस्यैव सिद्धान्तितत्वेन हलप्रत्याहारे लणित्याकार प्रवेशात्तस्य हलत्वेन मामाँस्त्रायस्वे त्यात्रानुनासिकपक्षेऽनुस्वारापत्तिः सोस्तीत्यादी सुलोपाद्यापत्तिश्च स्यात्। तस्माद प्रामाणिकन्तस्यानुनासिकत्वम् ऋलृवर्णयोरसांवर्ण्यात् 'उरणरपरः' इत्यत्र लकारग्रहणमावश्यकमेवेति वदन्तीति दिक्।

**निष्कर्षः**

रप्रत्याहारस्य विषयो वैयाकरणानाम्मते शास्त्रार्थं भूमि उच्यते। यतोहि आक्षरसमाम्नाये ''हयवरट (मा0सू0–05) लण (मा0सू0–06) इत्यत्र रलयो पृथक्ले रप्रत्याहारस्यास्यस्तित्वं स्विक्रियते। अन्यथा नवीनखेन विश्लेषणकार्येण रप्रत्याहारस्य खण्डनमाण्डन मुभयथा विवर्ण्यते।

**सन्दर्भ–सूची**

1. सिद्धान्तकौमुदी।
2. लघुशब्देन्दुशेखरः।
3. पणिनीय शिक्षा।
4. परिभाषेन्दुशेखरः।
5. अष्टाध्यायी।
6. पात(जलमहाभाष्यम्।
7. पशस्पशाह्निकम्।
8. लघुसिद्धान्तकौमुदी।